# Yugadharmakathanam

# युगधर्मकथनम्

## Document Information

Text title : Yugadharmakathanam

File name : yugadharmakathanam.itx

Category : misc, garuDapurANa

Location : doc_z_misc_general

Proofread by : PSA Easwaran

Description/comments : garuDapurANa | pUrvakhaNDa |adhyAya 223/12-16||

Latest update : October 3, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

October 3, 2024

*sanskritdocuments.org*

# युगधर्मकथनम्

ब्रह्मोवाच ।
मुनिभिश्चरिता धर्मा भक्त्या व्यास मयोदिताः ।
यैर्विष्णुस्तुष्यते चैव सूर्यादिपरिचारणात् ॥ १, २२३.१॥

तर्पणेन च होमेन सन्ध्याया वन्दनेन च ।
प्राप्यते भगवान् विष्णुर्धर्मकामार्थमोक्षदः ॥ १, २२३.२॥

धर्मो हि भगवान्विष्णुः पूजा विष्णोस्तु तर्पणम् ।
होमः सन्ध्या तथा ध्यानं धारणा सकलं हरिः ॥ १, २२३.३॥

सूत उवाच ।
प्रलयं जगतो वक्ष्ये तत्सर्वं शृणु शौनक ।
चतुर्युगसहस्रन्तु कल्पैकाब्जदिनं स्मृतम् ॥ १, २२३.४॥

कृतत्रेताद्वापरादियुगावस्था निबोधमे ।
कृते धर्मश्चतुष्पाच्च सत्यं दानं तपो दया ॥ १, २२३.५॥

धर्मपाता हरिश्चेति सन्तुष्टा ज्ञानिनो नराः ।
चतुर्वर्षसहस्राणि नरा जीवन्ति वै तदा ॥ १, २२३.६॥

कृतान्ते क्षत्त्रियैर्विप्रा विङ्शूद्राश्च जिता द्विजैः ।
शूरश्चातिबलो विष्णू रक्षांसि च जघान ह ॥ १, २२३.७॥

त्रेतायुगे त्रिपाद्धर्मः सत्यदानदयात्मकः ।
नरा यज्ञपरास्तस्मिंस्तथा क्षत्रोद्भवं जगत् ॥ १, २२३.८॥

रक्तो हरिर्नरैः पूज्यो नरा दशशतायुषः ।
तत्र विष्णुर्भीमरथः क्षत्रिया राक्षसानहन् ॥ १, २२३.९॥

द्विपादविग्रहो धर्मः पीतताञ्चाच्युते गते ।
चतुः शतायुषो लोका द्विजक्षत्रोद्भवाः प्रजाः ॥ १, २२३.१०॥

तत्र दृष्ट्वाल्पबुद्धींश्च विष्णुर्व्यासस्वरूपधृक् ।
तदेकन्तु चतुर्वेदं चतुर्धा व्यभजत्पुनः ॥ १, २२३.११॥

शिष्यानध्यापयामास समस्तांस्तान्निबोध मे ।
ऋग्वेदमथ पैलन्तु सामवेदञ्च जैमिनिम् ॥ १, २२३.१२॥

अथर्वणं सुमन्तुन्तु यजुर्वेदं महामुनिम् ।
वैशम्पायनसङ्गन्तु पुराणं सूतमेव च ।
अष्टादशपुराणानि यैर्वेद्यो हरिरेव हि ॥ १, २२३.१३॥

सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च ।
वंशानुचरितञ्चैव पुराणं पञ्चलक्षणम् ॥ १, २२३.१४॥

ब्राह्मं पाद्मं वैष्णवञ्च शैवं भागवतन्तथा ।
भविष्यन्नारदीयञ्च स्कान्दं लिङ्गं वराहकम् ॥ १, २२३.१५॥

मार्कण्डेयं तथाग्नेयं ब्रह्मवैवर्तमेव च ।
कौर्मं मात्स्यं गारुडञ्च वायवीयमनन्तरम् ।
अष्टादशसमुद्दिष्टं ब्रह्माण्डमिति संज्ञितम् ॥ १, २२३.१६॥

अन्यान्युपपुराणानि मुनिभिः कथितानि तु ।
आद्यं सनत्कुमारोक्तं नारसिंहमथापरम् ॥ १, २२३.१७॥

तृतीयं स्कान्दमुद्दिष्टं कुमारेण तु भाषितम् ।
चतुर्थं शिवधर्माख्यं स्यान्नन्दीश्वरभाषितम् ॥ १, २२३.१८॥

दुर्वाससोक्तमाश्चर्यं नारदोक्तमतः परम् ।
कापिलं वामनञ्चैव तथैवोशनसेरितम् ॥ १, २२३.१९॥

ब्रह्माण्डं वारुणञ्चाथ कालिकाह्वयमेव च ।
माहेश्वरं तथा साम्बमेवं सर्वार्थसञ्चयम् ।
पराशरोक्तमपरं मारीचं भार्गवाह्वयम् ॥ १, २२३.२०॥

पुराणं धर्मशास्त्रञ्च वेदास्त्वङ्गानि यन्मुने ।
न्यायः शौनक मीमांसा आयुर्वेदार्थशास्त्रकम् ।
गान्धर्वश्च धनुर्वेदो विद्या ह्यष्टादशस्मृताः ॥ १, २२३.२१॥

द्वापरान्तेन च हरिर्गुरुभारमपाहरत् ।
एकपादस्थिते धर्मे कृष्णत्वञ्चाच्युते गते ॥ १, २२३.२२॥

जनास्तदा दुराचारा भविष्यन्ति च निर्दयाः ।
सत्त्वं रजस्तम इति दृश्यन्ते पुरुषे गुणाः ।
कालसञ्चोदितास्तेऽपि परिवर्तन्त आत्मनि ॥ १, २२३.२३॥

प्रभूतञ्च यदा सत्त्वं मनो बुद्धीन्द्रियाणि च ।
तदा कृतयुगं विद्याज्ज्ञाने तपसि यद्रतिः ॥ १, २२३.२४॥

यदा कर्मसु काम्येषु शक्तिर्यशसि देहिनाम् ।
तदा त्रेता रजोभूतिरिति जानीहि शौनक ॥ १, २२३.२५॥

यदा लोभस्त्वसन्तोषो मानो दम्भश्च मत्सरः ।
कर्मणाञ्चापि काम्यानां द्वापरं तद्रजस्तमः ॥ १, २२३.२६॥

यदा सदानृतं तन्द्रा निद्रा हिंसादिसाधनम् ।
शोकमोहौ भयं दैन्यं स कलिस्तमसि स्मृतः ॥ १, २२३.२७॥

यस्मिञ्जनाः कामिनः स्युः शश्वत्कटुकभाषिणः ।
दस्यूत्कृष्टा जनपदा वेदाः पाषण्डदूषिताः ॥ १, २२३.२८॥

राजानश्च प्रजाभिक्षाः शिश्नोदरपराजिताः ।
अव्रता वटवोऽशौचा भिक्षवश्च कुटुम्बिनः ॥ १, २२३.२९॥

तपस्विनो ग्रामवासाः न्यासिनो ह्यर्थलोलुपाः ।
ह्रस्वकाया महाहाराश्चौरास्ते साधवः स्मृताः ॥ १, २२३.३०॥

त्यक्ष्यन्ति भृत्याश्च पतिं तापसस्त्यक्ष्यति व्रतम् ।
शूद्राः प्रतिग्रहिष्यन्ति वैश्या व्रतपरायणः ॥ १, २२३.३१॥

उद्विग्नाः सन्ति च जनाः पिशाचसदृशाः प्रजाः ।
अन्यायभोजनेनाग्निदेवतातिथिपूजनम् ॥ १, २२३.३२॥

करिष्यन्ति कलौ प्राप्ते न च पित्र्योदकक्रियाम् ।
स्त्रीपराश्च जनाः सर्वे शूद्रप्रायाश्च शौनक ॥ १, २२३.३३॥

बहुप्रजाल्पभाग्याश्च भविष्यन्ति कलौ स्त्रियः ।
शिरः कण्डूयनपरा आज्ञां भेत्स्यन्ति भर्त्सिताः ॥ १, २२३.३४॥

विष्णुं न पूजयिष्यन्ति पाषण्डोपहता जनाः ।
कलेर्दोषनिधेर्विप्रा अस्ति ह्येको महागुणः ॥ १, २२३.३५॥

कीर्तनादेव कृष्णस्य महाबन्धं परित्यजेत् ।

कृते यद्ध्यायतो विष्णुं त्रेतायां जपतः फलम् ॥ १, २२३.३६॥

द्वापरे परिचर्यायां कलौ तद्धरिकीर्तनात् ।
तस्माद्ध्येयो हरिर्नित्यं गेयः पूज्यश्च शौनक ॥ १, २२३.३७॥

इति श्रीगारुडे महापुराणे पूर्वखण्डे प्रथमांशाख्ये
आचारकाण्डे युगधर्मकथनं नाम त्रयोविंशत्यधिकद्विशततमोऽध्यायः ।

गरुडपुराण । पूर्वखण्ड । अध्याय २२३/१२-१६॥

garuDapurANa . pUrvakhaNDa . adhyAya 223/12-16..

Proofread by PSA Easwaran

---

*Yugadharmakathanam*
pdf was typeset on October 3, 2024

Please send corrections to *sanskrit@cheerful.com*